International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2017; 3(3): 34-35
© 2017 IJSR
www.anantaajournal.com
Received: 10-03-2017
Accepted: 11-04-2017

**त्रिदिव-राय-मण्डल**
शोधः छात्रः, रामकृष्णमिशन्-विवेकानन्दविश्वविद्यालयस्य, बेलुड-मठः, पश्चिम बंगाल, भारत

# मीमांसादर्शने देवतास्वरूपविचारः

## त्रिदिव-राय-मण्डल

## भूमिका

षड्दर्शनेषु मीमांसादर्शनमन्यतमम्। जैमिनिप्रणीतं पूर्वमीमांसादर्शनम्। बादरायणप्रणीतम् उत्तरमीमांसादर्शनम्। मीमांसादर्शनस्य सूत्रभाष्यादिषु ईश्वरः सम्यक्तया नालोचितश्चेदपि इन्द्रसूर्यादिदेवताः मीमांसकसम्मता इति तु देवताधिकरणे[९-१-६] स्पष्टं भवति। जैमिनिरस्मिन्नधिकरणे देवतास्वरूपमालोचितवान्। कर्मणः प्राधान्यं देवतायाश्च शब्दमयत्वमस्य अधिकरणस्य प्रतिपाद्यविषयः।देवतास्वरूपविषयेऽस्मिन् अनेकविप्रतिपत्तयः सन्ति। अतोऽत्र विचार्यांशस्य सद्भावात् देवतास्वरूपम् आलोच्यते।

## विमर्शः

वेदान्तिनः पौराणिकाश्च विग्रहादिमद्देवतायाः कल्पनां कुर्वन्ति। यथा पुराणस्तोत्रग्रन्थादिषु बज्रधारिरूपेण इन्द्रः, वृषभासीनरूपेण पशुपतिः, पशुधारिरूपेण वरुणः, गरुडवाहनरूपेण विष्णुः, हंसारूढरूपेण सरस्वती, दूर्गा सिंहारूढरूपेण कल्पिता वर्तते। केचन अर्थविशिष्टां देवतां स्वीकुर्वन्ति। कारणं हि यदा द्रव्यत्यागः क्रियते तदा शब्देनैव देवतायाः विधिगतार्थस्मरणं क्रियते। विधिवाक्ये विद्यमानानि देवतावाचकपदानि द्रव्यत्यागावाहनसूक्तवागादिहविनां त्यागकालीनोच्चारणकर्माणि भवन्ति।

व्यक्तद्रव्यस्य उद्देश्यभूता देवता। देवता नास्ति चेत् यागोऽसिद्धो भवति। आहुतद्रव्येण देवता अपरितृप्ता चेत् यागफललाभोऽपि असम्पूर्णस्तिष्ठति।तथापि यागादिरेवात्र प्रधानम्। कारणं हि यागादिरत्र विधेयः। यागादिनिष्पाद्यमपूर्वं प्रधानम्। यागकर्मण अपूर्व एव प्रयोजकः। स्वर्गकामो यजेत इत्यत्र साध्यः यागः। निर्दोषरूपेण यागानुष्ठानं क्रियते चेत् स्वर्गप्राप्तिर्भवति। द्रव्यदेवतादयः यागे अप्रधानभूताः भवन्ति।

**Correspondence**
त्रिदिव-राय-मण्डल
शोधः छात्रः, रामकृष्णमिशन्-विवेकानन्दविश्वविद्यालयस्य, बेलुड-मठः, पश्चिम बंगाल, भारत

जैमिनिना मीमांसासूत्रे निगदितं "अपि वा शब्दपूर्वत्वात् यज्ञकर्म प्रधानं स्यात् गुणत्वे देवताश्रुतिः[९-१-९] [1]" इति। याग एव फलदाता, न तु देवता। कारणं हि विधिवाक्यानुसारेण यागेन देवता व्यवहिता भवति। कर्मानुष्ठानव्यतिरेकेण देवतायाः फलप्रदातृत्वं न सम्भवति। अतः देवकृपां कारणरूपेण अमत्वा अदृष्टकल्पना क्रियते। यागाय श्रुतसाधनोपपत्त्यर्थं अपूर्वापरपर्यायादृष्टकल्पना कर्तव्या। यदि देवकृपा कारणरूपेण स्वीक्रयते तर्हि कार्यकारणभाव अवश्यं वक्तव्यः। कारणं हि कर्मानुष्ठातृषु तदधिकरणविशिष्टात्मसु कार्यकारणभावः कथमुत्पद्यते इति आशङ्का भवति। समवायसम्बन्धेन फलोत्पत्तिं प्रति स्वजनकयागमेव देवताप्रसादकारणरूपेण मत्वा तस्याः शङ्कायाः परिहारः क्रियते। भाट्टमते समवायसम्बन्धः न स्विक्रियते। अपि तु तत्स्थाने तादाम्यसम्बन्धः स्वीक्रियते।

मीमांसकाः देवतायाः विग्रहपञ्चकं न स्वीकुर्वन्ति। कारणं हि विग्रहस्य भोगः कर्मकाण्डे विधिमूलकः नास्ति। निर्दोषयज्ञानुष्ठानेन स्वत एव कर्म फलप्रदं भवति। तत्र देवतायाः प्रयोजनं नास्ति। सर्वथा देवता शब्दमयी इति मीमांसकाः नोक्तवन्तः। बहुषु वेदमन्त्रेषु देवतायाः विग्रहः प्रदर्शितः। 'मघवन् काशिवित्ते' [2], 'जगृम्भाते दक्षिणमिन्द्रहस्तम्' [3], 'तुविग्रीवो वपोदरः सुबाहुरन्धसो मदे। इन्द्रो वित्राणि जिघ्नते' [4] चेत्यादिमन्त्रा अत्र मानम्। शबरस्वामिनः देवतायाः शरीरं न स्वीकुर्वन्ति। देवताधिकरणभाष्ये[१-३-२६-३०] शङ्कराचार्याः देवताशरीरं स्वीकुर्वन्ति। 'यस्यै देवतायै हविर्गृहीतं स्यात् तां ध्यायेत् वषट्करिषाम्' [5] इत्यस्मात् मन्त्रात् ज्ञायते यत् यां देवतामुद्दिश्य हविर्दीयते तां देवतामादौ ध्यायेत् इति। विग्रहं विना ध्यानमसम्भवं भवति। इन्द्रादयः देवताः स्वमहिमावशात् एकस्मिन् समये अनेकानि शरीराणि धारयन्ति। शङ्कराचार्यैः ब्रह्मसूत्रभाष्ये उच्यते- "अनेकरूपप्रतिपत्तिसम्भवाच्च एकैका देवता बहुभिः रूपैरात्मानं प्रविभज्य बहुषु यागेषु युगपदङ्गभावं गच्छतीति" [6] इति। योगिभिः देवतामूर्तिः साक्षात्क्रियते। मन्त्रजपआदिना इष्टदेवतादर्शनं भवति। एवं देवतायाः विग्रहविषये मतद्वयं वर्तते। येन अर्थवादवाक्येन स्वस्यार्थं अन्यप्रमाणाविषयीकृतो भवति, पुनश्च अन्यप्रमाणविरुद्धोऽपि नास्ति स भूतार्थवाद उच्यते। देवतायाः शरीरादिविषये य अर्थवादः प्राप्यते तद्वेदवाक्याविरोधित्वात् अन्यप्रमाणाबाधितत्वाच्च अर्थवादः स्वार्थे तात्पर्यशून्यं नास्ति। देवतायाः शरीरं न स्वीक्रियते चेत् 'न देवानां देवतान्तराभावात्' इति शबरस्वाम्युक्तवचनं सामञ्जस्यरहितं स्यात्। केचन कथयन्ति येषां नये देवता शब्दमयी, तेषामेव पक्षे इयमुक्तिरसङ्गता भवति। मीमांसादर्शने उच्यते कुमारिलभट्टेन "येषां शब्द एव देवता तेषामप्ययुक्तो ग्रन्थः" [7] इति ।

## उपसंहार

एवं सर्वमालोच्यते चेत् स्पष्टं भवति यत् शब्दमयी देवता आत्मनः भिन्ना एव। आत्मा न शब्दमयः। "अशब्दमस्पर्शमरूपमव्ययम्" [8] इति मन्त्रोऽत्र मानम्। देवतायाः विग्रहवत्वादेव अनात्मत्वं स्पष्टम्। पुराणेऽपि दशावतारादिरूपेण देवतायाः चरित्रवर्णनात् आराधनात् पूजायाश्च सत्कर्मप्रयोजकात् ज्ञायते यत् आत्मनः भिन्ना एव देवता। अपि च समाजे धर्मानुशासनस्य स्थिरत्वरक्षणार्थम् आत्मनः देवता भिन्नरूपेण वर्णिता इति शम्।

## अवलोकितग्रन्था

जैमिनिः। (१८८३)। मीमांसादर्शनम्(शबरस्वामिभाष्यसहितम्)। जीवानन्दविद्यासागरः(सम्पादकः)। कलिकाताःसंस्कृत-पुस्तक-भाण्डारः।

बादरायणः। (२०१३)। वेदान्तदर्शनम्(बङ्गपुस्तकम्)। विश्वरूपानन्दस्वामी(अनुवादकः व्याख्याता च)।कलकाताःउद्बोधन-कार्यालयः।

कठोपनिषद्(बङ्गपुस्तकम्)। (२००२)। गोस्वामी सीतानाथः(सम्पादकः)। कलकाताःसंस्कृत-पुस्तक-भाण्डारः।